दक्षिणाचारः, पुं, (दक्षिणोऽप्रतिकूल आचारः ।) आचारविशेषः । यथा,—
"स्वधर्म्मनिरतो भूत्वा पञ्चतत्त्वेन पूजयेत् ।
स एव दक्षिणाचारः शिवो भूत्वा शिवां यजेत् ॥"
इत्याचारभेदतन्त्रम् ॥
(एतदाचारोक्तकर्म्मादिकं वामाचारवत् कठोरतरं न । तथाच काश्मीरराजप्रणीतदक्षिणाचारतन्त्रे ।
"दक्षिणाचारतन्त्रोक्तं कर्म्म तच्छुद्धवैदिकम् ॥"
दक्षिणोऽनुकूलः साधुराचारो व्यवहारो यस्य । शिष्टाचारविशिष्टे, त्रि । यथा, महाभारते । ४ । ५ । २७ ।
"दक्षिणा दक्षिणाचारो दिशं येनाजयत् प्रभुः ॥")
दक्षिणात्, व्य, (वसन्तागतो रमणीयं वा । दक्षिणस्यां दिशि दक्षिणस्या दिशः दक्षिणा वा दिक् इति । "उत्तराधरदक्षिणादातिः ।" ५ । ३ । ३४ । इति आतिः ।) दक्षिणस्यां दिशि । इत्यमरटीकायां रायमुकुटः ॥
दक्षिणापथजन्मा, [न्] पुं, (दक्षिणा दक्षिणस्यां दिशि यः पन्थाः तत्र जन्म यस्य ।) जातिविशेषः । यथा, महाभारते ।१२।२०७।४२-४५।
"दक्षिणापथजन्मानः सर्व्वे नरवरान्ध्रकाः ।
गुहाः पुलिन्दाः शवराः चुचुका मद्रकैः सह ॥
उत्तरापथजन्मानः कीर्त्तयिष्यामि तानपि ।
यौनकाम्बोजगान्धाराः किराता वर्व्वरैः सह ॥
एते पापकृतस्तात ! चरन्ति पृथिवीमिमाम् ।
श्वपाकबलगृध्राणां सधर्म्माणो नराधिप ! ॥
नैते कृतयुगे तात ! चरन्ति पृथिवीमिमाम् ।
त्रेताप्रभृति वर्त्तन्ते ते जना भरतर्षभ ! ॥"
दक्षिणामुखः, त्रि, (दक्षिणा दक्षिणस्यां दिशि मुखं यस्य ।) दक्षिणदिङ्मुखः । यथा,—
"अमावास्यां नराभाद्रं दक्षिणामुखभोजनम् ।
न जीवत्पितृकः कुर्य्यात् कृते च पितृहा भवेत् ॥"
इति तिथ्यादितत्त्वम् ॥
दक्षिणायनं, क्ली, (दक्षिणा दक्षिणस्यां दिशि दक्षिणे गोले वा अयनम् ।) सूर्य्यस्य दक्षिणागतिः । सा श्रावणादिषट्सु मासेषु भवति । इत्यमरः ॥ * ॥ यथा,—
"कर्कटावस्थिते भानौ दक्षिणायनमुच्यते ।
उत्तरायणमप्युक्तं मकरस्थे दिवाकरे ॥ इति ।
अयनस्योत्तरस्यादौ मकरं याति भास्करः ।
राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम् ॥"
इति विष्णुपुराणोक्तात्मूढादावयनपरिग्रहः सौरेण ।
दिनमानादिबोधे तु सिद्धान्तादयनपरिग्रहः ।
इति ।
मकरसंक्रान्तितः पूर्व्वं पञ्चाशदादिकान्तरं ।
एकवर्षे चतुःपञ्चपलमानक्रमेण तु ॥
षट्षष्टिवत्सरानेकादिनं स्यादयनं रवेः ।
एवं चतुःपञ्चदिनमयनारम्भणं क्रमात् ॥
यत्क्रमेण च तद्वत् स्यादुदगयानं रवेर्ध्रुवम् ।
कर्किसंक्रमणे तद्वदभितो दक्षिणायनम् ।
अयनांशक्रमेणैव विषुवारम्भणं तथा ॥"
इति च ज्योतिस्तत्त्वम् ॥
तत्र जातस्य फलं यथा,—
"याम्यायने यस्य भवेत् प्रसूतिः
शठः कठोरः पिशुनस्वभावः ।
चतुष्पदाढ्यः कृषिमानहंयु-
र्व्वाचामशान्तो मनुजः प्रतापी ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
कर्कटसंक्रान्तिः । यथा,—
"मृगकर्कटसंक्रान्ती द्वे तूदग्दक्षिणायने ।
विषुवती तुलामेषे गोलमध्ये तथापराः ॥"
इति तिथ्यादितत्त्वम् ॥ * ॥
अयनचक्रं यथा,—
"चक्रं सारं विलिख्य ग्रहपतिरयने संक्रमञ्चेत् करोति
यस्मिन्नृक्षे तदृक्षं मरणभयकरं मूलमूले निदध्यात् ।
तत्पश्चादारमूले विविधभयकरं मूलपार्श्वेऽर्थलाभः
सौख्यं स्याच्चक्रगर्भे विविधमुनिमतं विद्धि वामक्रमेण ॥"
इति ज्योतिषम् ॥
("त एते शीतोष्णवर्षलक्षणाश्चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरञ्च । तयोर्दक्षिणं वर्षाशरद्धेमन्तास्तेषु भगवानाप्यायते सोमोऽम्ललवणमधुराश्च रसा बलवन्तो भवन्त्युत्तरोत्तरञ्च सर्व्वप्राणिनां बलमभिवर्द्धते ॥"
इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये ॥)
दक्षिणारुः, [स्] पुं, (दक्षिणे दक्षिणभागे अरुर्व्रणमस्य ।) व्याधकर्त्तृकदक्षिणाङ्गव्रणितमृगः । इत्यमरः । २ । १० । २४ ॥
दक्षिणार्हः, त्रि, (दक्षिणामर्हतीति । अर्ह + "अर्हः ।" ३ । २ । १२ । इत्यच् ।) दक्षिणायोग्यः । यज्ञाश्रये दक्षिणामर्हति यः । इति भरतः ॥ तत्पर्य्यायः । दक्षिणीयः २ दक्षिण्यः ३ । इत्यमरः । ३ । १ । ५ ॥
दक्षिणावर्त्तकी, स्त्री, (दक्षिणे आवर्त्तते इति । आ + वृत् + ण्वुल् । गौरादित्वात् ङीष् ।) वृश्चिकालिः । इति राजनिर्घण्टः ॥
दक्षिणाशापतिः, पुं, (दक्षिणाशाया दक्षिणस्या दिशः अधिपतिः ।) यमः । इति हेमचन्द्रः । २ । ९८ ॥
दक्षिणीयः, त्रि, (दक्षिणामर्हतीति । दक्षिणा + "कडङ्गरदक्षिणाच्छ च ।" ५ । १ । ६९ । इति छः ।) दक्षिणार्हः । इत्यमरः । ३ । १ । ५ । (यथा, हरिवंशे । १८ । ७९ ।
"क्रतवः संप्रवर्त्तन्तां दक्षिणीयैर्द्विजातिभिः ।
दक्षिणाश्चोपवर्त्तन्तां यथोक्ताः सर्व्वसत्त्रिणः ॥"
तथाच अथर्व्ववेदे । ८ । १० । ४ ।
"यज्ञर्तो दक्षिणीयो वासतेयो भवति य एवं वेद ॥"
दक्षिणेन, व्य, (दक्षिण + "एनबन्यतरस्यामदूरेऽपञ्चम्याः ।" ५ । ३ । ३५ । इति एनप् ।) दक्षिणदिशि । इति रायमुकुटः ॥ दक्षिणभागे । (अस्य योगेन द्वितीया भवति ।) यथा,—
"दक्षिणेन हरिं रुद्रो गोविन्दमतिनेश्वरः ।
येनेशं हरिरीशश्च तेनेशमभितोऽचैकाः ॥"
इति मुग्धबोधम् ॥
(क्वचित् द्वितीयाप्रयोगाभावोऽपि दृश्यते । यथा, महाभारते । ३ । ८३ । ४ ।
"दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च ।
ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिपिष्टपे ॥")
दक्षिणेर्म्मा, [न्] पुं, (दक्षिणे ईर्म्मं व्रणं यस्य । "दक्षिणेर्म्मा लुब्धयोगे ।" ५ । ४ । १२६ । इति अनिच् ।) व्याधशराघातात् दक्षिणाङ्गव्रणयुक्तमृगः । तत्पर्य्यायः । दक्षिणारुः २ । इत्यमरः । १० । २४ ॥ (यथा, भट्टिः । ४ । ४४ ।
"मृगशुभिव मृगोऽथ दक्षिणेर्म्मा
दिशमिव दाहवतीं मराशुदन्यन् ॥")
दक्षिण्यः, त्रि, (दक्षिणामर्हतीति । "कडङ्गरदक्षिणाच्छ च ।" ५ । १ । ६९ । इति चकारात् यत् ।) दक्षिणार्हः । इत्यमरः । ३।१।५ ॥ (यथा, भट्टिः । २ । २९ ।
"दक्षिण्यदिष्टां कृतमार्त्तिलीने-
स्तद्यातुधानैश्चिचिते प्रसर्पत् ॥")
दग्धं, क्ली, कत्तृणम् । इति रत्नमाला ॥
दग्धः, त्रि, (दह्यते स्म इति । दह + क्तः ।) भस्मीकृतः । पोड़ा इति भाषा । तत्पर्य्यायः । प्लुष्टः २ उष्टः ३ उषितः ४ । इत्यमरः । ३ । १ । ९९ ॥ (यथा, मनुः । ८ । १८९ ।
"चौरैर्हृतं जलेनोढ़मग्निना दग्धमेव वा ।
न दद्यात् यदि तस्मात् स न संहरति किञ्चन ॥")
"पञ्चानामामिषं चर्म्मम् ।
गोर्व्वर्ण्यमामिषं क्षीरं फले जम्बीरमामिषम् ।
आमिषं रक्तशाकञ्च सर्व्वञ्च दग्धमामिषम् ॥"
इति कर्म्मलोचनम ॥
(म्लानम् । यथा, अमरुशतके । २४ ।
"रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते ॥"
चन्द्राश्रितराशिमूलकपारिभाषिकग्रहम् । यथा, ज्योतिषतत्त्वे ।
"मृगसिंहौ तृतीयायां प्रथमायां तुलाङ्गनौ ।
पञ्चम्यां बुधराशी द्वौ सप्तम्यां चापयन्त्रमे ॥
नवम्यां सिंहकीटाख्यावेकादश्यां गुरोर्गृहे ।
वृषमीनौ त्रयोदश्यां दग्धसंज्ञावमी ग्रहाः ।
दग्धसद्मनि यत् कर्म्म कृतं सर्व्वं विनश्यति ॥")
दग्धकाकः, पुं, (दग्ध इव कृष्णवर्णः काकः ।) द्रोणकाकः । इति हेमचन्द्रः । ४ । ३८९ ॥
दग्धरथः, पुं, (दग्धो रथोऽस्य ।) चित्ररथगन्धर्व्वः । इति महाभारतम् ॥ (यथा, महाभारते । १ । १७१ । ३९ ।
"अस्त्राग्निना विचित्रोऽयं दग्धो मे रथ उत्तमः ।
सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम् ॥")